**SET – 4**

**Series : GBM/C**

कोड नं.
**Code No.** **49**

**रोल नं.**
**Roll No.**

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **12** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **12** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (ऐच्छिकम्)

## SANSKRIT (Elective)

*समयो : होरात्रयम्*
*निर्धारित समय : **3** घंटे*
*Time allowed : **3** hours*

*पूर्णाङ्का: : **100***
*अधिकतम अंक : **100***
*Maximum Marks : **100***



collegedunia
India's largest Student Review Platform

| | |
|---|---|
| **निर्देशाः :** | *संकेताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।* |
| **निर्देश :** | *जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।* |
| **Instructions :** | *Answer all questions in Sanskrit, unless instructions are given otherwise.* |

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्डः क | : | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | **15 अङ्काः** |
| Section A | : | Unseen Reading Comprehension | |
| खण्डः ख | : | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | **15 अङ्काः** |
| Section B | : | Writing Skills in Sanskrit | |
| खण्डः ग | : | पठितांश – अवबोधनम् संस्कृतसाहित्यस्य परिचयः च (पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय) | **40 + 10 = 50 अङ्काः** |
| Section C | : | Reading Comprehension & Introduction to History of Sanskrit Literature | |
| खण्डः घ | : | छन्दोऽलङ्काराः (छन्द एवम् अलङ्कार) | **20 अङ्काः** |
| Section D | : | Metres and Figures of Speech | |



collegedunia.com
India's largest Student Review Platform

## खण्डः क (Section A) 15 अङ्काः

### अपठितांश – अवबोधनम्

### अपठितांश – अवबोधन

### Unseen Reading Comprehension

1. अधोलिखितम् अनुच्छेद**द्वयं** पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following **two** passages and answer the given questions in Sanskrit.

**(क) प्रथमः अनुच्छेदः**

"भारतवर्षे सर्वत्र विविधतायाम् एकतायाः दर्शनं भवति । भारतदेशः धर्मनिरपेक्षः वर्तते । अत्र हिन्दु-मुस्लिम-सिख-इसाई इत्यादयः विविधधर्मावलम्बिनः मिलित्वा वसन्ति । भारतीयाः उत्सवप्रियाः सन्ति । कस्यापि धर्मस्य उत्सवः भवेत् ते परस्परं मिलित्वा सोत्साहं मानयन्ति । उत्सवेषु सर्वेषाम् उत्साहः दर्शनीयः भवति । वर्णानां रीतीनां धर्माणाञ्च वैविध्यम् अस्माकं देशस्य वैशिष्ट्यमस्ति ।"

**प्रश्नाः**

(अ) एकपदेन उत्तरत । ½ × 2 = 1

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) भारतः कीदृशः देशः वर्तते ?

(ii) भारतवर्षे कस्याः दर्शनं भवति ?

(ब) पूर्णवाक्येन उत्तरत । 2

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

अस्माकं देशस्य वैशिष्ट्यं किमस्ति ?

(स) यथानिर्देशम् उत्तरत । ½ × 4 = 2

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'मानयन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'समारोहः' इति पदस्य किं समानार्थकम् अत्र प्रयुक्तम् ?

(iii) 'ते' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(iv) 'धर्मनिरपेक्षः' इति विशेषणस्य विशेष्यं किम् ?



collegedunia India's largest Student Review Platform

**(ख) द्वितीयः अनुच्छेदः**

"अस्मिन् आधुनिके युगे आतंकवादः बृहत्तरा समस्या वर्तते । अयं युगः वैज्ञानिकयुगः आविष्काराणां युगः च वर्तते । परं केचन देशाः इदानीमपि पौराणिकं जीवनं जीवितुमिच्छन्ति । तादृशाः देशाः समाजस्य उन्नतिं नेच्छन्ति । ते तु आतंकवादिनां परिपोषणं कृत्वा आतङ्कवादं प्रसारयन्ति । आतङ्कपीडितस्य देशस्य उन्नतिः अवरुद्धा भवति यतोहि तस्य सर्वाणि संसाधनानि आतङ्कवादस्य निराकरणे संलग्नानि भवन्ति । न कोऽपि तादृशः देशः यत्र आतङ्कवादस्य छाया न दृश्यते । एतस्याः समस्यायाः समाधानं तावत् न भविष्यति यावत् सम्पूर्णं विश्वं गम्भीरतया चिन्तनं प्रयत्नश्च न करिष्यति ।"

**प्रश्नाः**

(अ) एकपदेन उत्तरत । **1 × 2 = 2**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) आतङ्कपीडितस्य देशस्य का अवरुद्धा भवति ?

(ii) आतङ्कवादस्य निराकरणे कानि संलग्नानि भवन्ति ?

(ब) पूर्णवाक्येन उत्तरत । **2 × 1 = 2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

आतङ्कपीडितस्य देशस्य उन्नतिः कथम् अवरुद्धा भवति ?

(स) यथानिर्देशम् उत्तरत । **1 × 4 = 4**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'करिष्यति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'ते' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(iii) 'पौराणिकम्' इति विशेषणस्य विशेष्यं किम् ?

(iv) 'अवनतिः' अस्य विलोमपदं किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । **2**

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write a suitable title for this passage in Sanskrit.



collegedunia.com India's largest Student Review Platform

## खण्डः ख (Section B) 15 अङ्काः

### संस्कृतेन रचनात्मकलेखनम्

### संस्कृत में रचनात्मक लेखन

### Writing Skills in Sanskrit

2. मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पुनः पूरयित्वा पुनः लिखत । 1 × 10 = 10

मञ्जूषा से उचित सङ्केत लेकर निम्नलिखित कथा को पूरा करके पुनः लिखिए ।

Complete and rewrite the following story, with the help of the words given in the box below.

**कथा**

"महाभारतयुद्धस्य अन्ते यदा भीष्मः ________ (i) आसीत् तदा द्रौपदी तम् अपृच्छत् – 'यदा सभायां ________ (ii) मम वस्त्रापहरणं करोति स्म, तदा भवान् कौरवेभ्यः ________ (iii) ज्ञानं किमर्थं न अयच्छत् ? मम साहय्यं किमर्थं न ________ (iv) ?' भीष्मः अवदत् – 'मया सर्वदा दुर्योधनस्य ________ (v) अन्नं भक्षितम् । पापमयस्य अन्नस्य प्रभावात् अहं ________ (vi) प्रयोगो असमर्थः अभवम् ।' द्रौपदी पुनः तम् अपृच्छत् – 'इदानीं कथं ________ (vii) ज्ञानं विवेकश्च प्रादुरभूताम्' ? भीष्मः उदतरत् – 'अर्जुनस्य ________ (viii) मम पापमयः रुधिरः बहिरगच्छत् । अतः मम ________ (ix) निर्मला जाता, विवेकः च जागृतोऽभवत् ।' मनुष्येभ्यः आवश्यकमस्ति – यत् उचितैः साधनैः आजीविका ________ (x) येन मनसि सुविचाराः आगच्छेयुः ।

**मञ्जूषा**

| |
|---|
| अर्जनीया, बुद्धिः, शरशय्यायाम्, दुःशासनः, पापमयम्, भवतः, स्वविवेकस्य, बाणैः, धर्मस्य, अकरोत् । |

3. मञ्जूषातः पदानि चित्वा 'पर्यावरणम्' इति विषयम् अधिकृत्य **पञ्च** वाक्यानि संस्कृतेन लिखत । 1 × 5 = 5

मञ्जूषा से पद चुनकर 'पर्यावरण' विषय पर संस्कृत में **पाँच** वाक्य लिखिए ।

Write **five** sentences in Sanskrit on 'Environment' (पर्यावरणम्) with the help of the words given in the box below.

**मञ्जूषा**

| |
|---|
| वाहनानाम्, आधुनिकम्, जानाति, नद्यः, ध्वनिप्रदूषणम्, भवति, वनानि, वायुः, अस्ति, वृक्षाः, मनुष्यः, घटकाः, प्रदूषिता, अविष्काराः, निर्माणीनाम्, अवकरः, दूषितं जलम्, छिद्यन्ते । |



collegedunia India's largest Student Review Platform

## खण्डः ग (Section C) **40 + 10 = 50 अङ्काः**

### पठितांश–अवबोधनं संस्कृतसाहित्यस्य परिचयः च

### पठितांश–अवबोधन एवं संस्कृत साहित्य परिचय

### Reading Comprehension & Introduction to History of Sanskrit Literature

4. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित गद्यांश, पद्य तथा नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following prose, poetry and drama passages and answer the given questions in Sanskrit.

**(क) गद्यांश :**

"मासोऽयमाषाढः, अस्ति च सायं समयः, अस्तं जिगमिषुर्भगवान् भास्करः सिन्दूरद्रव–स्नातानामिव वरुण–दिगवलम्बिनामरुण–वारिवाहानामभ्यन्तरं प्रविष्टः । कलविंकाश्चाटकैररुतैः परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते । वनानि प्रतिक्षणमधिकाधिकां श्यामतां कलयन्ति ।"

**प्रश्ना :**

(अ) एकपदेन उत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) कानि श्यामतां कलयन्ति ?

(ii) कः अस्तं जिगमिषुः अस्ति ?

(ब) पूर्णवाक्येन उत्तरत । **2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

के नीडेषु प्रतिनिवर्तन्ते ?

(स) यथानिर्देशम् उत्तरत । **1 × 2 = 2**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'सूर्यः' अस्य पर्यायः कः ?

(ii) 'प्रातः' अस्य विलोमपदं किम् ?



collegedunia.com India's largest Student Review Platform

**(ख) पद्यम्**

"पापान्निवारयति योजयते हिताय,
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले,
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।"

**प्रश्नाः**

(अ) एकपदेन उत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) कः पापात् निवारयति ?

(ii) सन्मित्रं कुत्र योजयते ?

(ब) पूर्णवाक्येन उत्तरत । **2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

सन्मित्रं किं करोति ?

(स) यथानिर्देशम् उत्तरत । **1 × 2 = 2**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'सन्तः' इति कर्तृपदस्य क्रियापदं किम् ?

(ii) 'दोषान्' अस्य विलोमपदं किम् ?

**(ग) नाट्यांशः**

"लवः : दृष्टमवगतं च । नूनमाश्वमेधिकोऽयमश्वः ।

बटवः : कथं ज्ञायते ?

लवः : ननु मूर्खाः ! पठितमेव हि युष्माभिरपि तत्काण्डम् । किं न पश्यथ ? प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः । यदि च विप्रत्ययस्तत्पृच्छत ।

बटवः : भो भोः ! किंप्रयोजनोऽयमश्वः परिवृतः पर्यटति ?"

**प्रश्नाः**

(अ) एकपदेन उत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) कीदृशः अयम् अश्वः ?

(ii) युष्माभिः किं पठितम् ?



collegedunia.com India's largest Student Review Platform

(ब) पूर्णवाक्येन उत्तरत । **2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

रक्षितारः कीदृशाः सन्ति ?

(स) यथानिर्देशम् उत्तरत । **$1 \times 2 = 2$**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'सैनिकाः' अस्य पदस्य पर्यायः कः ?

(ii) 'विद्वांसः' अस्य पदस्य विलोमपदं किम् ?

5. शब्दार्थान् मेलयित्वा लिखत । **$\frac{1}{2} \times 4 = 2$**

शब्दों का अर्थों से मिलान करके लिखिए ।

Match the words with their meanings and rewrite the same.

| | **शब्दाः** | | **अर्थाः** |
|---|---|---|---|
| (अ) | अरिः | (i) | सारल्यम् |
| (ब) | लगुडः | (ii) | पर्वतः |
| (स) | आर्जवम् | (iii) | शत्रुः |
| (द) | अचलः | (iv) | दण्डः |

6. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । **$1 \times 4 = 4$**

रेखाङ्कित पदों के आधार पर प्रश्न-निर्माण कीजिए ।

Frame questions on the basis of the underlined words.

(i) पौराणिकाः सप्तद्वीपानि वदन्ति ।

(ii) लगुडं प्रक्षिप्य कोष्ठके निलीनः अभवम् ।

(iii) तस्येप्सितं देवः सम्पादयति ।

(iv) आलोकयतु तावत् लक्ष्मीम् एव प्रथमम् ।



collegedunia.com India's largest Student Review Platform

7. अधोलिखितभावार्थयोः रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कृत्वा लिखत । **½ × 12 = 6**

निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्तस्थानों की पूर्ति करके लिखिए ।

Fill in the blanks in the following **two** explanations with the help of the words given in the box and rewrite the same.

(अ) "विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।"

**भावार्थः**

ईशोपनिषदि कथितम्–यः ________ (i) व्यवहारिकविद्यायाः आध्यात्मिकविद्यायाः च ________ (ii) सम्यग्तया ________ (iii) सः अविद्यया मृत्योः ________ (iv) गच्छति अनन्तरं ________ (v) सः संसारस्य आवागमनचक्रात् ________ (vi) भवति ।

(ब) "नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।।"

**भावार्थः**

श्रीकृष्णः अर्जुनमुपदिशति यत् मनुष्यैः नित्यं नियतानि ________ (i) करणीयानि । यः जनः कर्म न ________ (ii) तस्मात् मनुष्यात् कर्म कुर्वन् जनः ________ (iii) भवति । अकर्मणः जनस्य ________ (iv) व्यवहारः अपि न ________ (v) । अतः त्वं नित्यं कर्म ________ (vi) ।

**मञ्जूषा**

| |
|---|
| जनः, कर्माणि, करोति, अवगच्छति, मुक्तः, पारम्, कुरु, सिद्धयति, श्रेष्ठः, लौकिकः, उभौ, विद्याभ्यासेन । |

8. अधोलिखितयोः श्लोकयोः अन्वय**द्वये** रिक्तस्थानपूर्तिं कुरुत । **1.5 + 1.5 = 3**

निम्नलिखित **दोनों** श्लोकों के अन्वयों में रिक्तस्थानों की पूर्ति कीजिए ।

Fill in the blanks in the following prose-order-renderings of the **two** verses.

(अ) "स मृन्मये वीतहिरण्मयत्वात्
पात्रे निधा यार्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः
प्रत्युज्जगामातिथिमातिथेयः ।"

**अन्वयः**

सः आतिथेयः ________ (i) यशसा प्रकाशः वीतहिरण्मयत्वात् ________ (ii) पात्रे अर्घ्यं निधाय ________ (iii) अतिथिं प्रति उज्जगाम ।



collegedunia.com India's largest Student Review Platform

(ब) "पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम्,
दीर्घग्रीवः स भवति, खुरास्तस्य चत्वार एव ।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः ।।

**अन्वयः**

सः पश्चात् ________ (i) पुच्छं वहति, तच्च अजस्रं धूनोति, सः दीर्घग्रीवः भवति, तस्य ________ (ii) चत्वार एव । (सः) शष्पाणि अत्ति ________ (iii) शकृत् पिण्डकान् प्रकिरति । व्याख्यानैः किम् ? स पुनः दूरं व्रजति, एहि, एहि, यामः ।

9. यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत । **½ × 4 = 2**
कर्ता एवं क्रियापद चुनिए ।
Select the subject and the verb.
(i) नाशयति च पुरुषमत्यासंगः विषयेषु ।
(ii) सः समुद्रतीरं गत्वा गन्धपुष्पादिषोडशोपचारं विधाय अब्रवीत् ।

(ब) विशेषणपदं चिनुत । **1 × 2 = 2**
विशेषण पद चुनिए ।
Select the adjective.
(i) अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः ।
(ii) भयानकेन स्वनेन कवलीकृतमिव गगनतलम् ।

(स) अधोलिखितपङ्क्त्योः रेखाङ्कितसर्वनामपदे काभ्यां प्रयुक्ते ? **1 × 2 = 2**
निम्नलिखित पंक्तियों में रेखांकित सर्वनाम पद किनके लिए प्रयुक्त हुए हैं ?
In the following lines for whom are the underlined pronouns used ?
(i) कृतप्रतिज्ञः <u>असौ</u> निजकार्यान्न विरमति ।
(ii) जानामि <u>तं</u> पश्यन्ती वञ्चितेव ।

(द) अधोलिखितपङ्क्तिभ्यां 'पराक्रमः' तथा 'नीरम्' इति पदयोः समानार्थके पदे चित्वा लिखत । **1 × 2 = 2**
निम्नलिखित पंक्तियों में से 'पराक्रम' तथा 'नीर' पदों के समानार्थक पद चुनकर लिखिए ।
Select and write the synonyms of the words 'पराक्रमः' and 'नीरम्' from the following lines.
(i) अहं निजशौर्यं प्रकाशयन् लगुडमात्रामादाय अन्धकार एव चौरनिग्रहाय प्रचलितोऽभवम् ।
(ii) गुरुपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम् ।



collegedunia.com India's largest Student Review Platform

(य) कः कं कथयति ? ½ × 4 = 2

कौन किसको कह रहा है ?

Who is saying this to whom ?

(i) 'भवान् यज्ञदक्षिणाकालं व्यतिक्रम्य समागतः ।'

(ii) 'भगवान् यीशुस्तव मङ्गलं वितनोतु । मम पूर्वतनं पत्रं त्वया प्राप्तं स्यात् ।'

10. (अ) अधोलिखितलेखकानां कस्यापि **एकस्य** काव्यस्य नाम लिखत । 1 × 5 = 5

निम्नलिखित लेखकों के किसी **एक** काव्य का नाम लिखिए ।

Write the name of any **one** work of each of the following poets.

भर्तृहरिः, मथुरानाथ शास्त्री, वेदव्यासः, बाणभट्टः, दाराशिकोहः ।

(ब) अधोलिखितरचनानां लेखकानां नामानि लिखत । 1 × 5 = 5

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए ।

Write the names of the authors of the following works.

उत्तररामचरितम्, शिवराजविजयः, पाषाणीकन्या, प्रबन्ध-मञ्जरी, शिशुपालवधम् ।

collegedunia.com India's largest Student Review Platform

## खण्डः घ (Section D) 10 + 10 = 20 अङ्काः

### छन्दोऽलङ्काराः

### छन्द एवम् अलङ्कार

### Metres and Figures of Speech

11. (अ) प्रश्नान् उत्तरत । 1 × 2 = 2

प्रश्नों के उत्तर दीजिए ।

Answer the questions.

(i) 'कुशली' अत्र को गणः ?

(ii) 'पतञ्जलिः' अत्र 'त' वर्णः लघुः गुरुः वा ?

(ब) अधोलिखितपरिभाषाः पूरयत । 1 × 4 = 4

निम्नलिखित परिभाषाओं को पूरा कीजिए ।

Complete the following definitions.

(i) '________ उदीरितं जरौ ।'

(ii) 'मन्दाक्रान्ताम्बुधि ________ तौ गयुग्मम् ।'

(iii) '________ मालिनी भोगिलोकैः ।'

(iv) 'श्लोके षष्ठं गुरुर्ज्ञेयं ________ ।
द्विचतुष्पादयोः ह्रस्वं सप्तमं दीर्घमन्ययोः ।।'



collegedunia.com India's largest Student Review Platform

(स) अधोलिखितयोः **एकस्य** छन्दसः उदाहरणं लिखत । **2**

अधोलिखित में से **एक** छन्द का उदाहरण लिखिए ।

Write an example of any **one** of the following metres.

इन्द्रवज्रा, शिखरिणी ।

(द) अधोलिखितपङ्क्त्योः किं किं छन्दः ? **1 × 2 = 2**

निम्नलिखित पंक्तियों में कौन–कौन सा छन्द है ?

What is the metre in the following lines ?

(i) आपद्गतं च न जहाति ददाति काले ।

(ii) यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा ।

12. (अ) अधोलिखितयोः कस्यचि**देकस्य** शब्दालङ्कारस्य सोदाहरणं लक्षणं लिखत । **3**

निम्नलिखित में से किसी **एक** शब्दालङ्कार का सोदाहरण लक्षण लिखिए ।

Write the definition and example of any **one** of the following figures of speech शब्दालङ्कार.

यमकम्, श्लेषः ।

(ब) कस्यचि**देकस्य** अर्थालङ्कारस्य लक्षणमुदाहरणं च लिखत । **3**

किसी **एक** अर्थालङ्कार का लक्षण एवं उदाहरण लिखिए ।

Define and illustrate any **one** of the figures of speech अर्थालङ्कार.

उपमा, रूपकम् ।

(स) अधोलिखितपङ्क्त्योः अलङ्कारं निर्दिशत । **1 × 2 = 2**

निम्नलिखित पंक्तियों में अलङ्कार का निर्देश कीजिए ।

Indicate the figure of speech in the following lines.

(i) विचारपरम्परा परपारे परावर्त्यत ।

(ii) न तु कदाचित् कापुरुषा इव स्वस्थानम् अपहाय प्रपलायन्ते ।

(द) अधोलिखितपरिभाषा**द्वयं** पूरयत । **1 × 2 = 2**

निम्नलिखित **दोनों** परिभाषाओं को पूर्ण कीजिए ।

Complete the following definitions of the **two** figures of speech.

(i) ________ अनुषक्तार्थान्तराभिधा ।

(ii) भवेत् सम्भावनो ________ ।



collegedunia India's largest Student Review Platform